विद्याविलास-ग्रन्थमालायाः चतुर्विंशतितमं (२४) पुष्पम्

अथ

श्रीशिवसंहितोक्ता रामार्चापद्धतिः

पण्डित श्रीगुलाबझा शास्त्रिणा सम्पादिता

सं० २०१६] मूल्यं ०० [ई० १९६०

(पुनर्मुद्रणादिकाः सर्वेऽधिकाराः प्रकाशकाधीनाः)

pdf by dindayalamani@gmail.com

अथ श्रीशिवसंहितोक्ता रामार्चापद्धतिः

तत्र पूजनप्रकारः

पुण्ये दिने सुनक्षत्रे भक्तिश्रद्धान्वितेऽथवा। नित्यकृत्यं समाराध्य श्रीरामार्चां प्रकल्पयेत् ॥ १ ॥
आदौ पुण्यस्थले चैव सुजलेन मृदा तदा। शोधितायां धरायां च विरचेन्मण्डपं शुभम् ॥ २ ॥
रक्त-वितान-संयुक्तं सपताकं सतोरणम्। मनोहरैश्चतुर्द्वारैः शोभनं श्रद्धयाऽन्वितम् ॥ ३ ॥
द्वारेषु पूर्णकुम्भाँश्च सुचित्रान् शुभपल्लवान्। सदीपान् पट्टिकायुक्तान् तण्डुलोपरि स्थापयेत् ॥ ४ ॥
सफलान् कदलीस्तम्भाँश्चतुष्कोणेषु रोपयेत। तन्मध्ये चतुरस्रं च पीठकं श्लक्ष्णमुत्तमम् ॥ ५ ॥
पीतास्तरणसंयुक्तं संस्थाप्य वरशोभनम्। शालितण्डुलचूर्णैश्च नील-पीत-सिताऽसितैः ॥ ६ ॥
एकविंशतिकोष्ठं वै यन्त्रं तत्रैव कारयेत्। आवाहनं च देवानां कुर्यात् सङ्कल्पपूर्वकम् ॥ ७ ॥

अथ पूजाविधिः

तत्र व्रती पूजासने उपविश्य(१)पञ्चदेवता विष्णुं च सम्पूज्य कुशत्रयतिलजलान्यादाय—ॐ विष्णुर्विष्णुर्विष्णु-रद्य नमः परमात्मने श्रीपुराणपुरुषोत्तमाय श्रीरामाय, अद्य श्रीब्रह्मणोऽह्नि द्वितीयप्रहरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्व-तमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशे अमुकसंवत्सरे

---

(१) सति सम्भवे—'ॐ स्वस्ति न इन्द्रो वृद्धश्रवा' इत्यादिना स्वस्तिवाचनं कृत्वैव पूजनमारभेत्।

(महाल)

pdf by dindayalamani@gmail.com

अमुकमासे अमुकपक्षे अमुकतिथौ अमुकगोत्रस्य मम श्री अमुकशर्मणः(१) सकलपापनिरसनपूर्वक-सर्वारिष्टशान्त्यर्थं मनोऽभिलषितशुभफलावाप्तये परमहंसास्वादितचरणकमलचिन्मकरन्दभक्तजनमानसनिवासश्रीसीतारामप्रीतये यथोपलब्धनामभिः समस्ताऽऽवरणदेवतापूजनपूर्वकं श्रीसीतारामार्चनं तन्माहात्म्यरूपकथाश्रवणं(२) चाहं करिष्ये। इति सङ्कल्प्य शान्तिकलशस्थापनं कुर्यात्।

तत्र प्रथमं भूमिपूजनम्—उदकेन भूमिमभ्युक्ष्य सजलकुशाक्षतैः—ॐ कलशाधारशक्ते इहागच्छ इह तिष्ठेत्यावाह्य—ॐ कलशाधारशक्तये नमः। इति पञ्चोपचारैः सम्पूज्य भूमिं स्पृष्ट्वा—ॐ भूरसि भूमिरस्यदितिरसि-विश्वधाया विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं माहिꣳसीः॥ इति भूशुद्धिं कृत्वा—ॐ मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः। मानो वीरान् रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥ इति गामयन भूममुपलिप्य—धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनुप्रसितिमायुषेधान् देवो वः। सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि॥ इति मन्त्रेण तदुपरि यवान् विकीर्य—ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वतीपुनर्मा विशताद्रयिः॥ इति मन्त्रेण यवोपरि कलशं स्थापयेत्। ततः—ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋतसदन्यसि। वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद॥ इति कलशे जलं दत्त्वा—ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्तानो मुञ्चत्वꣳहसः॥

---

(१) ग्रामपूजायान्तु—'अमुकगोत्रस्य मम श्री अमुकशर्मणः' इत्यस्य स्थाने—'एतद्ग्रामवासिनां नानागोत्राणां सकलजनानाम्, एतत्पूजोपकारकाणाम्, अन्यद्ग्रामवासिनां च' इति योज्यम्।

(२) अष्टयामकीर्तनसत्त्वे—कीर्तनमण्डलीद्वारा अष्टयामकीर्तनम्' इति चात्र योज्यम्।

pdf by dindayalamani@gmail.com

इति कलशे नारिकेलं पूगीफलं वा दत्त्वा—ॐ अम्बे अम्बिकेऽम्बालिके नमानयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्॥ इति कलशे आम्रपल्लवं दद्यात्। ततः—ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥ इति कलशे दूर्वादलं प्रक्षिप्य—ॐ प्राणाय स्वाहा, अपानाय स्वाहा, व्यानाय स्वाहा। इति कलशे ताम्बूलं दद्यात्। ततः—ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ इति कलशे हिरण्यादि (१)पञ्चरत्नं द्रव्यं प्रक्षिपेत्। ततः 'ॐ धान्यमसि धिनुहि' इति पूर्वोक्तमन्त्रेण दीपाधारपात्रे यवं दत्त्वा—ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा, सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा, अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा, सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा, ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा॥ इति कलशोपरि पूर्वाभिमुखं प्रज्वलितदीपं निदध्यात्। ततः प्राणप्रतिष्ठां कुर्यादनेन—ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु। विश्वेदेवास इह मादयन्तामों प्रतिष्ठ। ॐ शान्तिकलशाधिष्ठितगणेशादिदेवता इह सुप्रतिष्ठिता भवन्तु। इति प्रतिष्ठाप्य—ॐ शान्तिकलशाधिष्ठितगणेशादिदेवताभ्यो नमः। इति पञ्चोपचारैः पूजयेत्।

ततः आवरणपूजा—ॐ माहेश्वरि नमस्तुभ्यमिहागच्छ शिवप्रिये। पूर्वभागे समातिष्ठ गृह्यतां पूजनं मम॥ ॐ माहेश्वर्यै नमः। इति पञ्चोपचारैः पूजयेत्। ततः ॐ—गणाधिप नमस्तुभ्यमिहागच्छ गजानन। पूर्वभागे समातिष्ठ पूजनं गृह्यतामिदम्॥ ॐ गणाधिपाय नमः। इति पञ्चोपचारैः पूजयेत्। ततः ॐ—महाशक्ति नमस्तुभ्यमिहागच्छ शुभप्रदे। पूर्वभागे समातिष्ठ पूजनं प्रतिगृह्यताम्॥ ॐ महाशक्त्यै नमः। इति पञ्चोपचारैः पूजयेत्। ततः ॐ—महालक्ष्मि नमस्तुभ्यमिहागच्छ जगद्धिते। याम्यभागे समातिष्ठ पूजनं स्वीकुरुष्व मे॥ ॐ महालक्ष्म्यै

---

(१) कनकं हीरकं नीलं पद्मरागं च मौक्तिकम्। पञ्चरत्नमिदं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः॥
पुनश्चतत्रैव—रत्नानां चाप्यभावे तु स्वर्णं कर्षार्धमेव च। स्वर्णस्याप्यभावे तु आज्यं देयं विचक्षणैः॥

pdf by dindayalamani@gmail.com

नमः। इति पञ्चोपचारैः पूजयेत्। ततः ॐ—महादुर्गे नमस्तुभ्यमिहागच्छ सुरार्चिते। पीठस्य पश्चिमे भागे तिष्ठ स्वीकुरु पूजनम्॥ ॐ महादुर्गायै नमः। इति पञ्चोपचारैः पूजयेत्। ततः ॐ—भो गायत्रि नमस्तुभ्यमिहागच्छ शुभप्रदे। तिष्ठ पीठोत्तरे भागे पूजनं प्रतिगृह्यताम्। ॐ गायत्र्यै नमः। इति पञ्चोपचारैः पूजयेत्। ततः ॐ—भो सावित्रि नमस्तुभ्यमिहागच्छ शुभप्रदे। तिष्ठ पीठोत्तरे भागे पूजनं स्वीकुरुष्व मे॥ ॐ सावित्र्यै नमः। इति पूजयेत्। ततः—ॐ सरस्वति नमस्तुभ्यमिहागच्छ शुचिव्रते। पीठकस्योत्तरे भागे तिष्ठ पूजां प्रगृह्यताम्। ॐ सरस्वत्यै नमः इति पूजयेत्। ततः—ॐ नमो वः सर्वमातृभ्य इहागच्छत तिष्ठत। पीठकस्योत्तरे भागे गृह्यतां मम पूजनम्। ॐ सर्वमातृभ्यो नमः। इति पूजयेत्। ततः ॐ—सिद्धिदेवि नमस्तुभ्यमिहागच्छ सुव्रतप्रदे। ईशाने त्वं सदा तिष्ठ पूजनं प्रतिगृह्यताम्। ॐ सिद्धिदेव्यै नमः। इति पूजयेत्। ततः ॐ—बुद्धे नमोऽस्तु ते मातरिहागच्छ सुभाषिणि। ईशाने हि समातिष्ठ पूजनं स्वीकुरुष्व मे। ॐ बुद्ध्यै नमः। इति पूजयेत्। ततः ॐ—लोकमातर्नमस्तुभ्यमिहागच्छ शुभप्रदे। अग्निकोणे समातिष्ठ पूजनं प्रतिगृह्यताम्। ॐ लोकमात्रे नमः। इति पूजयेत्। ततः—ॐ महादेवि नमस्तुभ्यमिहागच्छ वरानने। नैर्ऋत्यै तिष्ठ देवेशि पूजनं स्वीकुरुष्व मे॥ ॐ महादेव्यै नमः। इति पूजयेत्। ततः ॐ—देवमातर्नमस्तुभ्यमिहागच्छ कृपाम्बुधे। वायव्ये देवि संतिष्ठ पूजनं प्रतिगृह्यताम्॥ ॐ देवमात्रे नमः। इति पूजयेत्। ततः ॐ—नमोऽस्तु वो ग्रहाः सर्वे इहागच्छत तिष्ठत। पूर्वाऽग्निकोणयोर्मध्ये गृह्यन्तां मम पूजनम्॥ ॐ नवग्रहेभ्यो नमः। इति पूजयेत्। ततः ॐ—नमो वो दशदिक्पाला इहागच्छत तिष्ठत। पूर्वाऽग्निकोणयोर्मध्ये गृह्यतां पूजनं मम॥ ॐ दशदिक्पालेभ्यो नमः। इति पूजयेत्। ततः ॐ—गौरीपते नमस्तुभ्यमिहागच्छ महेश्वर। अग्निदक्षिणयोर्मध्ये तिष्ठ पूजां गृहाण मे॥ ॐ गौरीपतये नमः। इति पूजयेत्। ततः ॐ—नमो वो वास्तुदेवेभ्य इहागच्छत तिष्ठत। याम्यनैर्ऋतयोर्मध्ये गृह्यतां पूजनं मम।

pdf by dindayalamani@gmail.com

ॐ वास्तुदेवेभ्यो नमः। इति पूजयेत्। ततः ॐ—नमो वो लोकपालेभ्य इहागच्छत तिष्ठत। रक्षोवरुणयोर्मध्ये गृह्यतां पूजनं मम॥ ॐ लोकपालेभ्यो नमः। इति पूजयेत्। तत ॐ—भो मनो त्वमिहागच्छ नमस्तुभ्यं सुखप्रद। पश्चिमे ह्युपविश्याथ पूजनं प्रतिगृह्यताम्॥ ॐ श्रीमनवे नमः। इति पूजयेत्। ततः ॐ—नमो वः श्रीवसिष्ठाद्या इहागच्छत तिष्ठत। वायु-वारुणयोर्मध्ये गृह्यतां पूजनं मम॥ ॐ वसिष्ठादिभ्यो नमः। इति पूजयेत्। ततः ॐ—अधिप्रत्यधिदेवेभ्य इहागच्छत तिष्ठत। मारुतोत्तरयोर्मध्ये गृह्यतां पूजनं मम॥ ॐ अधिप्रत्यधिदेवेभ्यो नमः। इति पूजयेत्। ततः ॐ—भो ब्रह्मन् त्वमिहागच्छ नमस्तुभ्यं सुराधिप। उत्तरेशानयोर्मध्ये तिष्ठ गृह्णीष्व मेऽर्चनम्॥ ॐ ब्रह्मणे नमः। इति पूजयेत्। ततः ॐ—अयोध्यायै नमस्तुभ्यमिहागच्छ सुखास्पदे। मध्यभागे समातिष्ठ पूजनं प्रतिगृह्यताम्॥ ॐ अयोध्यायै नमः। इति पूजयेत्। ततः ॐ—श्रीसरय्वीश्वराराध्ये नमस्तुभ्यं जगद्धिते। श्रीकोशलोत्तरे भागे तिष्ठ पूजां प्रगृह्यताम्॥ ॐ श्रीसरय्वै नमः। इति पूजयेत्। ततः ॐ—गङ्गादेवि महाभागे इहागच्छ नमोऽस्तु ते। पूर्वभागे समातिष्ठ पूजनं प्रतिगृह्यताम्॥ ॐ श्रीगङ्गादेव्यै नमः। इति पूजयेत्। ततः ॐ—भो भूशक्ते नमस्तुभ्यमिहागच्छ शुभप्रद। याम्यभागे सदा तिष्ठ पूजनं स्वीकुरुष्व मे॥ ॐ भूशक्तये नमः इति पूजयेत्। ततः ॐ—वह्निबीज नमस्तुभ्यमिहागच्छ शुचिव्रत। याम्यभागे सदा तिष्ठ पूजनं संगृहाण मे॥ ॐ वह्निबीजाय नमः। इति पूजयेत्। ततः ॐ—भो केशरिन् नमस्तुभ्यमिहागच्छ शुचिव्रत। याम्यभागे सदा तिष्ठ पूजनं प्रतिगृह्यताम्। ॐ श्रीकेशरिणे नमः इति पूजयेत्। ततः ॐ-भो सुषेण नमस्तुभ्यमिहागच्छ शुभप्रद। याम्यभागे समातिष्ठ पूजनं स्वीकुरुष्व मे॥ ॐ सुषेणाय नमः। इति पूजयेत्। ततः ॐ—ऋक्षराज नमस्तुभ्यमिहागच्छ महाबल। याम्यभागे समातिष्ठ पूजनं प्रतिगृह्यताम्॥ ॐ ऋक्षराजाय नमः। इति पूजयेत्। ततः ॐ—भो अङ्गद तमस्तुभ्यमिहागच्छ दृढव्रत। याम्यभागे समातिष्ठ संगृहाण ममाऽर्चनम्॥ ॐ श्री अङ्गदाय

pdf by dindayalamani@gmail.com

नमः। इति पूजयेत्। ततः ॐ—भो सुग्रीव नमस्तुभ्यमिहागच्छ प्रभोः प्रिय। दक्षिणे ह्युपविश्याथ गृह्यतामर्चनं मम॥ ॐ श्रीसुग्रीवाय नमः। इति पूजयेत्। ततः ॐ—श्रीविमलादिशक्तिभ्य इहागच्छत वो नमः। पश्चिमे ह्युपविश्याथ पूजनं प्रतिगृह्यताम्॥ ॐ श्रीविमलादिशक्तिभ्यो नमः। इति पूजयेत्। ततः—ॐ विभीषण नमस्तुभ्यमिहागच्छ प्रभोः प्रिय। पीठकस्योत्तरे भागे पूजनं प्रतिगृह्यताम्॥ ॐ विभीषणाय नमः। इति पूजयेत्। ततः ॐ—नमो वो मन्त्रिणश्चाऽष्टाविहागच्छत तिष्ठत। पूर्वभागे मया दत्तं गृह्यन्तां पूजनं मम॥ ॐ अष्टमन्त्रिभ्यो नमः। इति पूजयेत्। ततः ॐ—नमोऽस्तु ते दशरथ चक्रवर्त्तिन् महामते। पूर्वभागे समातिष्ठ श्रीकौशल्यादिभिः सह॥ ॐ सपत्नीकाय दशरथाय नमः। इति पूजयेत्। ततः ॐ—श्रीलक्ष्मण नमस्तुभ्यमिहागच्छ प्रियायुतः। याम्यभागे समातिष्ठ पूजनं संगृहाण मे॥ ॐ सपत्नीकाय लक्ष्मणाय नमः। इति पूजयेत्। ततः ॐ—श्रीभरत नमस्तुभ्यमिहागच्छ प्रियायुतः। पीठकस्योत्तरे भागे तिष्ठ पूजां गृहाण मे॥ ॐ सपत्नीकाय भरताय नमः। इति पूजयेत्। ततः ॐ—श्रीशत्रुघ्न नमस्तुभ्यमिहागच्छ प्रियायुतः। पीठस्य पश्चिमे भागे पूजनं स्वीकुरुष्व मे॥ ॐ सपत्नीकाय शत्रुघ्नाय नमः। इति पूजयेत्। ततः ॐ—श्रीहनुमन् नमस्तुभ्यमिहागच्छ कृपानिधे। पूर्वभागे समातिष्ठ पूजनं स्वीकुरु प्रभो॥ ॐ श्रीहनुमते नमः। इति पूजयेत्।

अथ प्रधानपूजा। तत्र ध्यानम्—रक्ताम्भोजदलाभिरामनयनं पीताम्बरालङ्कृतं, श्यामाङ्गं द्विभुजं प्रसन्नवदनं श्रीसीतया शोभितम्। कारुण्यामृतसागरं प्रियगणैर्भ्रात्रादिभिर्भावितं, वन्दे विष्णुशिवादिसेव्यमनिशं भक्तेष्टसिद्धिप्रदम्। इति ध्यात्वा ॐ—आगच्छ देवदेवेश जानक्या सह राघव। गृहाण मम पूजां च वायुपुत्रादिभिर्युतः॥ इत्यावाह्य—ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनो त्वरिष्टं यज्ञꣳ समिमं दधातु। विश्वेदेवास इह मादयन्तामों प्रतिष्ठ। ॐ ससीत रामचन्द्र इह सुप्रतिष्ठो भव। इति प्राणप्रतिष्ठां विधाय ॐ—सुवर्णरचितं राम

pdf by dindayalamani@gmail.com

दिव्यास्तरणशोभितम्। आसनं हि मया दत्तं गृहाण मणिचित्रितम्॥ इदमासनं ससीतरामचन्द्राय नमः। ततः ॐ—इदं पाद्यं मया दत्तं दिव्यं नरवरोत्तम। प्रसीद जानकीनाथ गृहाण सम्मुखो भव॥ इदं पाद्यं ससीत०। ॐ—दिव्यौषधिरसोपेतं दिव्यसौरभ्यसंयुतम्। तुलसी-पुष्प-दर्भाढ्यमर्घ्यं मे प्रतिगृह्यताम्॥ इदमर्घ्यं ससीत०। ॐ—सुगन्धवासितं दिव्यं निर्मलं सरयूदकम्। गृहाणाचमनं नाथ जानक्या सह राघव॥ इदमाचमनीयं ससीत०। ॐ—नमो रामाय भद्राय तत्त्वज्ञानस्वरूपिणे। मधुपर्कं गृहाणेमं जानकीपतये नमः॥ इदं मधुपर्कं ससीत०। ॐ—पञ्चामृतं मयाऽऽनीतं पयो दधि घृतं मधु। युतं शर्करया देव गृहाण जगतीपते॥ इदं पञ्चामृतस्नानं ससीत०। ॐ—दिव्यतीर्थहृतैस्तोयैः सर्वौषधीसमन्वितैः। संस्नापयाम्यहं भक्त्या प्रीयतां जानकीपते॥ इदं शुद्धोदकस्नानं ससीत०। ओं—सन्तप्तकाञ्चनप्रख्यं पीताम्बरमिदं हरे। संगृहाण जगन्नाथ रामचन्द्र नमोऽस्तु ते॥ इदं वस्त्रं बृहस्पतिदैवतं ससीत०। ओं—यज्ञोपवीतं सौवर्णं मया दत्तं रघूत्तम। गृहाण सुमुखो भूत्वा प्रसीद करुणानिधे॥ इमे यज्ञोपवीते बृहस्पतिदैवते ससीत०। ओं—किरीटं कुण्डलं हारं कङ्कणाङ्गदनूपुरम्। नानारत्नमयं दिव्यं भूषणं प्रतिगृह्यताम्॥ इदं भूषणं ससीत०। ओं—मलयाचलसम्भूतं शीतमानन्दवर्द्धनम्। कश्मीरघन-साराढ्यं चन्दनं प्रतिगृह्यताम्॥ इदं चन्दनं सतीत०। ओं—नमः श्रीरामचन्द्राय नमो मङ्गलमूर्त्तये। उत्तरीयमिदं वस्त्रं गृहाण करुणानिधे॥ इदमुत्तरीयवस्त्रं बृहस्पतिदैवतं ससीत०। ओं—कोमलानि सुगन्धीनि मञ्जरीसंयुतानि च। तुलस्याः सुदलान्येव गृहाण रघुवल्लभ॥ एतानि तुलसीपत्राणि ससीत०। ओं—सौरभाणि सुमाल्यानि सुपुष्परचितानि च। नानाविधानि पुष्पाणि गृह्यतां जानकीपते॥ एतानि पुष्पाणि, इदं माल्यं च ससीत०। ओं—दूर्वादलसमायुक्तं पत्रं पुष्पं सहाङ्कुरम्। यत्नं तिलं महाभाग गृह्यतां सीतया सह॥ इदं दूर्वादलं ससीत०। ओं—नमः श्रीजानकीनाथ सौन्दर्यादिगुणाम्बुधे। पादगुल्फादिषट्त्रेषु ह्यङ्गपूजां गृहाण मे॥ इत्यङ्गपूजां

pdf by dindayalamani@gmail.com

समर्प्य ॐ—वनस्पतिरसोत्पन्नं सुगन्धाढ्यं मनोहरम् । धूपं गृहाण देवेश जानक्या सह राघव ॥ एष धूपः ससीत० । ॐ—घृतवर्तिसमायुक्तं कर्पूरादिसमन्वितम् । दीपं गृहाण देवेश मम सिद्धिप्रदो भव ॥ एष दीपः ससीत० । ॐ—पूप-मोदक-संयाव-पयःपक्वादिकं वरम् । निर्मितं बहुसंस्कारैर्नैवेद्यं प्रतिगृह्यताम् ॥ एतानि नानाविधनैवेद्यानि ससीत० । ॐ—शीतलं स्वादु शुद्धं च परतृप्तिकरं जलम् । समस्तदेवदेवेश प्रीत्यर्थं प्रतिगृह्यताम् ॥ इदं शुद्धोदकं ससीत० । ॐ—सर्वौषधिरसोपेतं सौरभं सरयूजलम् । आचमनं मया दत्तं गृहाण करुणानिधे ॥ इदमाचमनीयं ससीत० । ॐ—फलान्यमृतकल्पानि स्थापितानि पुरस्तव । तेन मे सफला प्राप्तिर्भवेज्जन्मनि जन्मनि ॥ एतानि फलानि ससीत० । ॐ—नागलोकसमुद्भूतं रससौरभ्यसंयुतम् । ताम्बूलं ते प्रयच्छामि गृहाण परमेश्वर ॥ इदं ताम्बूलं ससीत० । ॐ—कर्पूरवर्तिसंयुक्तं गोघृतेन सुपूरितम् । नीराजनं गृहाणेदं कृपया भक्तवत्सल ॥ इदं नीराजनं ससीत० । ॐ—श्रीफलं स्वादु दिव्यं च सुधाधिकतरं प्रियम् । सदक्षिणं गृहाणेदं प्रणतार्तिहर प्रभो ॥ इदं श्रीफलं ससीत० । ॐ आञ्जनेय महाभाग राजभक्तिमहोदधे । प्रसादं रामचन्द्रस्य संगृहाण प्रसीद मे ॥ इदं श्रीरामप्रसादं हनुमते नमः । ततोऽपराधक्षमापनम्, ॐ—श्रीवल्लभाऽनन्त जगन्निवास, श्रीराम राजेन्द्र नमो नमस्ते । सदा सनाथं कुरु माननाथं, नाथ प्रभो दीनदयालमूर्ते ॥ ततो नमस्कारः, ॐ—राजेन्द्रपुत्राय परात्पराय, स्वच्छाय सस्मेरशुभाननाय । श्यामाय रामाय सहप्रियाय, नमः सदाऽभीष्टफलप्रदाय ॥ ततः प्रार्थना, ॐ—सहप्रियस्त्वं हृदये वस प्रभो, मुखे यशोनामगुणानुवादनम् । प्रीत्याऽर्चनं ते करवाणि सन्ततं, प्रदेहि मह्यं स्वकृपां कृपाम्बुधे ॥ दयाब्धे जानकीनाथ महाराजकुमारक । ममाऽभीष्टं कुरुष्वाद्य शरणागतवत्सल ॥ आवाहनं न जानामि न जानामि विसर्जनम् । पूजां चैव न जानामि त्वं गतिः परमेश्वर ॥ इति नमस्कृत्य रामार्चामाहात्म्यं शृणुयात् ।

pdf by dindayalamani@gmail.com

अथ रामार्चामाहात्म्यम्

प्रथमोऽध्यायः

पार्वत्युवाच—भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद । लोकानामुपकारार्थं यत्नान्युक्तान्यनेकशः ॥
तन्त्राणि यन्त्रजालानि मन्त्रभेदाश्च भूरिशः । स्तोत्राणि विविधान्येव योगयज्ञव्रतादि च ॥
तपांसि चैव दानानि सर्वसिद्धिकराणि च । तत्रापि दुःखिता लोका नानाक्लेशसमन्विताः ॥
धनहीनाः पुत्रहीना आधिव्याधिसमाकुलाः । न सिद्ध्यन्ति क्रियाः काश्चिल्लोकाः सन्ति श्रमार्दिताः ॥
तस्मात् कथय सर्वज्ञ सद्यः प्रत्ययकारकम् । उपायं सर्वलोकानां सर्वाभीष्टार्थसिद्धिदम् ॥
सम्यग् विचिन्त्य विश्वेश येन सिद्धिर्भवेद् ध्रुवम् ।

महादेव उवाच—धन्यासि कृतपुण्यासि पुण्यरूपासि पार्वति । यतस्त्वं सर्वलोकानां हितं वाञ्छसि सर्वदा ॥
शृणु देवि प्रवक्ष्यामि प्रयत्नं परमाद्भुतम् । यस्य स्मरणमात्रेण सिद्धिं प्राप्नोति दुर्लभाम् ॥
यज्ञः श्रीरामचन्द्रस्य साधनानां च साधकः । धर्मार्थ-काम-मोक्षाणां प्रापक-स्तुष्टि-पुष्टिदः ॥
ब्रह्मा सृजति यज्ञेन विश्वं विष्णुश्च रक्षति । यज्ञेनाऽहं जगत् सर्वं नाशयामि वरानने ॥
रामयज्ञं विना सिद्धिं नाप्नुयादन्यकर्मभिः । पूजां दानं जपो यज्ञं तपः कुर्यादखण्डितम् ॥
सिद्धिं न प्राप्नुयाद् देवि तस्माद् वक्ष्यामि सुव्रते । महायज्ञोत्तमां सर्वं तपोदानफलप्रदाम् ॥
कामनासिद्धिदां सौम्यां सर्वविघ्नविनाशिनीम् । रामार्चां शोभने कृत्वा न कश्चिद् दुःखभाङ् नरः ॥

pdf by dindayalamani@gmail.com

रामार्चायाः परो यज्ञो रामार्चायाः परं तपः । रामार्चायाः परं दानं रामार्चायाः परो जपः ॥
रामार्चायाः परं पुण्यं नास्ति लोकेषु त्रिष्वपि । रामार्चनं परं सेव्यं बद्धोद्धारकरं परम् ॥
महासिद्धिप्रदं सौम्यं सर्वकामफलप्रदम् । सर्वारिष्टहरं क्षिप्रं सर्वोपद्रवनाशनम् ॥
आधि-व्याधिप्रहरणं वाञ्छाधिकफलप्रदम् । पुत्रपौत्रादिसुखदं बलवीर्यविवर्धनम् ॥
राज्यदं नष्टराज्यानां निर्धनानां धनप्रदम् । दुर्भिक्षे वृष्टिजनकं महोत्पातनिवारणम् ॥
नाशनं शत्रुसैन्यानां मित्रवर्गविवर्धनम् । महादारिद्र्य-दौर्भाग्य-दुःखितानां सुखावहम् ॥
सौभाग्यसन्ततिकरं सर्वैश्वर्यसुखप्रदम् । क्षयाऽपस्मारकुष्ठादि-महारोगार्तिनाशनम् ॥
ऋणभारप्रहरणं ग्रह-विग्रह-वारणम् । क्रोधमात्सर्यहरणं दोषदुर्बुद्धिनाशनम् ॥
क्षमासौशील्य-सौहार्दसद्गुणानां प्रकाशनम् । त्रिकालज्ञानजननं षड्विकारविनाशनम् ॥
मुक्तिदं च मुमुक्षूणामगतीनां गतिप्रदम् । महासङ्कष्टसन्तप्तचेतसां सुखवर्धनम् ॥
नाऽन्यं पश्यामि देवेशि साधनं सकलेष्टदम् । रामार्चनं विना देवि श्रुतं नैव कदाचन ॥
रामार्चा सिद्धिरूपा हि सर्वेषां श्रेय इच्छताम् । किं होमैः सद्व्रतैस्तीर्थैः किं तपोभिः किमध्वरैः ॥
किमन्यैरर्चनैरुग्रैः साधनैश्च प्रयासदैः । रामार्चनेन ओ देवि किञ्चिदिष्टं न दुर्लभम् ॥
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् । अन्यानि यानि लोकेऽस्मिन् साधनानि बहूनि च ॥
कदाचिन्नैव सिद्ध्यन्ति देवि रामार्चनं विना । रामार्चनमकृत्वा तु कुर्यादन्यव्रतादिकम् ॥
कल्पकोटिसहस्रेषु न तेषां फलभाग् भवेत् । ग्रहाणां च यथा भानुर्नक्षत्राणां यथा शशी ॥
रामार्चनं परं देवि तथा सर्वसुकर्मणाम् । अत्र ते कथयिष्यामि कथां पौराणिकीं शुभाम् ॥

pdf by dindayalamani@gmail.com

प्रलयान्ते महाविष्णोर्नाभिकञ्जाद् जगद्गुरुः । जातः सर्वतमोभूतं विश्वं दृष्ट्वाऽतिदुःखितः ॥
एकाकी कमले तिष्ठन् किं करोमीत्यचिन्तयत् ॥
तदाकाशेऽभवद् वाणी ब्रह्माणं कमलोद्भवम् । ब्रह्मन् कुरु महासृष्टिं वृत्तिजां त्वर्थसङ्कुलाम् ॥
सृष्ट्यै बहुविधां चिन्तां चकार मनसा विधिः । न सृष्टिकरणे शक्तो बभूव चतुराननः ॥
तदा चिन्ताकुलो ब्रह्मा सस्मार परमेश्वरम् । यो मेऽकार्षीत् समुत्पत्तिं यो मां वाक्यैरबोधयत् ॥
कर्ता कारयिता सोऽद्य भवेन्मे दृष्टिगोचरः । तस्याऽहं शरणं प्राप्तो भूयो भूयो नमो नमः ॥
ब्रह्मणः स्मरणाद् देवि महाविष्णुः सनातनः । प्राप्तो वाक्यमुवाचेदं ब्रह्मन् रामार्चनं कुरु ॥
श्रुत्वा ब्रह्मा नमस्कृत्य संस्तुत्योवाच सादरम् । देवदेव कथं कुर्यां रामार्चां तद् वदाऽधुना ॥
भगवानुवाच—शृणुष्वावहितो ब्रह्मन् रामार्चां सर्वसिद्धिदाम् । यत् कृत्वा मानवाः सर्वे सर्वसौभाग्यसत्तमाः ॥
तद्विधिं संप्रवक्ष्यामि सावधानोऽवधारय । रामभक्तान् समाहूय बन्धुवर्गान् सुहृद्द्विजान् ॥
सद्भक्त्या तोषयेत् सर्वान् सर्वाभीष्टार्थसिद्धये । पञ्चम्यां पञ्चदश्यां वा द्वादश्यां संक्रमेऽयने ॥
नवम्यां चाप्यमायां वा यस्मिन कस्मिन्दिनेऽथवा । मध्याह्ने वा प्रदोषे वा रामार्चां कारयेत् सुधीः ॥
आदौ पुण्यस्थले चैव सुजले च मृदा तदा । शोधितायां धरायां च विरचेन्मण्डपं शुभम् ॥
रक्तवितानसंयुक्तं सपताकं सतोरणम् । मनोहरैश्चतुर्द्वारैः शोभनं श्रद्धयान्वितम् ॥
द्वारेषु पूर्णकुम्भाँश्च सहचित्रान् सपल्लवान् । सदीपान् पट्टिकायुक्तान् तण्डुलोपरि स्थापयेत् ॥
सफलान् कदलीस्तम्भाँश्चतुष्कोणेषु रोपयेत् । तन्मध्ये चतुरस्रं च पीठकं श्लक्ष्णमुत्तमम् ॥
पीतास्तरणसंयुक्तं संस्थाप्य वरशोभनम् । शालितण्डुलचूर्णैश्च नील-पीत-सिताऽसितैः ॥

pdf by dindayalamani@gmail.com

एकविंशतिकोष्ठं वै यन्त्रं तत्रैव कारयेत् । तस्य मध्ये रघुवरं परिवारसमन्वितम् ॥
सम्यगावाहयेद् भक्त्या माहेश्वर्यादिपूर्वकम् । गौरीगणेशयोः ब्रह्मन् पूजयेत् पुरतः स्थितम् ॥
पूर्वभागे महाशक्तिं पूजयेद् विधिपूर्वकम् । महालक्ष्मीं दक्षिणे च महादुर्गां च पश्चिमे ॥
गायत्रीं सावित्रीं वाणीं सर्वमातृस्तथोत्तरे । सिद्धिं बुद्धिं तथेशाने चाऽऽग्नेय्यां लोकमातरम् ॥
नैर्ऋत्यां च महादेवीं वायव्ये देवमातरम् । पूर्वेशानदिशोर्मध्ये ग्रहाणां पूजनं चरेत् ॥
पूर्वाग्निमध्ये दिक्पालानग्नियाम्यान्तरे शिवम् । याम्यनैर्ऋत्ययोर्मध्ये वास्तुदेवान् समर्चयेत् ॥
अष्टौ लोकपतीन् वीरान् रक्षोवारुणकान्तरे । प्रत्यङ्मनुं वसिष्ठादीन् वा वारुणमध्यगान् ॥
पवनोत्तरदिग्भागे चाधि-प्रत्यधि-देवताः । उत्तरेशानयोर्मध्ये ब्रह्मपूजां समाचरेत् ॥
अयोध्यां पूजयेन्मध्ये चोत्तरे सरयूं तथा । गङ्गां पूर्वे तथा याम्ये भूशक्तिं च समर्चयेत् ॥
पुनर्याम्ये नलं नीलं केशरिणं सुषेणकम् । अङ्गदम् ऋक्षराजं च सुग्रीवं च समर्चयेत् ॥
पश्चिमे वै तथा शक्तीर्विमलादीश्च पूजयेत् । पराभक्तियुतं नित्यं विभीषणमथोत्तरे ॥
पूर्वेऽष्टौ मन्त्रिणः पूज्याः सर्वशास्त्रविशारदाः । पङ्क्तिस्यन्दनकं पूर्वे कौशल्यादिभिरन्वितम् ॥
दक्षिणे लक्ष्मणं पश्चाच्छत्रुघ्नं च सशक्तिकम् । उत्तरे भरतं चैव सशक्तिं च समर्चयेत् ॥
हनूमन्तं पूर्वभागे क्रमेणैव समर्चयेत् । ततः प्रधानपुरुषं श्रीरामं हि समर्चयेत् ॥
पाद्यार्घ्याचमनीयाद्यैः स्नानैः पञ्चामृतादिभिः । पीताम्बरोपवीताद्यैश्चन्दनैस्तुलसीदलैः ॥
यवाक्षततिलैः पुष्पैः मालादूर्वाङ्कुरैः शुभैः । धूपैर्दीपैः सुनैवेद्यैस्ताम्बूलैश्च सुगन्धिभिः ॥
मोदकाद्यं सुनैवेद्यं पञ्चसेटोत्तरं वरम् । नानाविधैः सुपक्वान्नैः स्वादुभिश्च फलैस्तथा ॥

pdf by dindayalamani@gmail.com

नारिकेलबलिं दद्यान्नीराजनमतः परम्। चतुःप्रदक्षिणं कृत्वा प्रणमेत् प्रार्थयेत् पुनः॥
प्रसादो रामभद्रस्य प्रदातव्यो हनूमते। प्रहृष्टो वायुतनयो वाञ्छितार्थं प्रयच्छति॥
कुर्यादेवं विधानेन रामार्चां भक्तितो विधे। यथाविभवविस्तारो वित्तशाठ्यं न कारयेत्॥
सुवर्णप्रतिमायां वा शालिग्रामशिलोपरि। तिलपुञ्जेऽथवा पूजा कर्त्तव्या राघवस्य च॥
पूर्वं बाल्ये त्वया वत्स मन्दाकिन्यास्तटे शुभे। चित्रकूटे कृता सृष्ट्यै श्रीरामार्चा ममाज्ञया॥
पूजान्ते तु महाभाग प्रादुर्भूतो रघूत्तमः। तुभ्यं वरप्रदानं च दत्त्वाऽन्तर्ध्यानमागमत्॥
रामप्रसादं भक्तेभ्यो दत्त्वा भुक्तस्त्वया तदा। पूर्णं बभूव तेऽभीष्टं यद्यन्मनसि कांक्षितम्॥
रामार्चायाः प्रसादं यो भुञ्जीत प्रेममानसः। बन्धून् विभज्य तस्याशु मनोऽभीष्टं भवेद् ध्रुवम्॥
रामार्चायाः प्रसादं तु न भुञ्जीत विधे यदि। महादुःखार्दितो भूत्वा रौरवे नरके व्रजेत्॥
ब्रह्महत्यादिकं पापं मनो-वाक्-काय-कर्मजम्। कोटिजन्मार्जितं नश्येद्रामभुक्तान्नभक्षणात्॥
एवं यः कुरुते ब्रह्मन् रामार्चां सद्विधानतः। तस्य क्षिप्रं भवेत् सिद्धिर्मनोऽभिलषिता पुरा॥
इत्युक्त्वाऽन्तर्दधे विष्णुर्ब्रह्मलोकपतिः शुभे। चक्रार रामपूजां च तया सर्वेप्सितार्थभाक्॥
ब्रह्मणा चिन्तितं यद्यत् तत्तदाप्तं हि सत्त्वरम्। ब्रह्मलोके प्रकुर्वन्ति देवा रामार्चनं सदा॥
तत्प्रभावेण ते सर्वे परमानन्दशालिनः। भुञ्जन्ते विविधान् भोगान् सर्वेषामपि दुर्लभान्॥

इति श्रीशिवसंहितायां भव्योत्तरखण्डे शिवपार्वतीसंवादे पूजाविधिवर्णनं नाम प्रथमोध्यायः।

pdf by dindayalamani@gmail.com

अथ द्वितीयोऽध्यायः

श्रीपार्वत्युवाच—कैः कः कृता पुरा देव रामार्चा तद्वदाऽधुना। श्रोतुमिच्छामि देवेश मम हर्षविवर्धन ॥
महादेव उवाच—शृणु देवि कथां पुण्यां पूजामाहात्म्यसंयुताम्। वक्ष्यामि सर्वमर्त्येभ्यः शुभदां पापमोचिनीम् ॥
कश्चिद् वसति धर्मज्ञो ब्राह्मणो माथुरे पुरे। नाम्ना पृथुकविख्यातो महारोगेण पीडितः ॥
बहुभिर्विविधिर्यत्नं कृतवान् ब्राह्मणोत्तमः। न मुक्तो रोगबाधाभिर्महादीनमना द्विजः ॥
निर्जगाम गृहात् तूर्णं वनं व्याघ्रादिभिर्युतम्। बभ्राम दुःखसंत्रस्तो मृत्योर्हेतुं विचिन्तयन् ॥
आत्महत्याभयाद् देवि न विषैस्त्यक्तवाँस्तनुम्। भ्रमन् भृगुसुतं तत्र ऋचीकं दृष्टवान् द्विजः ॥
नत्वा रुरोद दुःखार्त्तो महाबाधाप्रपीडितः। ऋचीको ब्राह्मणं प्राह कस्माद् रोदिषि तद्वद ॥
ऋचीकेरितमाकर्ण्य पृथुको वाक्यमब्रवीत्। ब्राह्मणोऽहं द्विजश्रेष्ठ विख्यातः पृथुकाह्वयः ॥
सर्वव्याधियुतो विद्वन् महारोगेण पीडितः। येन दुःखं मम क्षीयेत् तद् वदस्व कृपानिधे ॥
श्रुत्वा कृपान्वितो विप्रो रामार्चां कुरु प्रोक्तवान्। रामार्चाया विधिं विद्वन् कथयस्व परन्तप ॥
पृथुक उवाच—श्रुत्वोवाच ऋचीकस्तु शृणु विप्र वचो मम। कुशनाभसुतो गाधिः श्वशुरो मम धर्मवित् ॥
सोऽनपत्योऽभवत् पूर्वं तेन दुःखी निरन्तरम्। तस्य पुत्री मम पत्नी तयाऽहं परितोषितः ॥
प्रहर्षितोऽहमूचे तां वरं ब्रूहि सुमध्यमे। तयोक्तं चैव मे भ्राता भवेद्वरमिदं प्रभो ॥
तथाऽस्त्विति महाभागे प्रोच्या चाऽहं भृगुं गतः। भृगुं ब्रह्मविदं विप्र वृत्तान्तं तन्निवेदितम् ॥
श्रुत्वा भृगुरुवाचेदं गाधिपुत्राय भो सुत। रामार्चां कारय प्रेम्णा ताभ्यां सम्यग् विधानतः ॥

pdf by dindayalamani@gmail.com

तत्प्रसादेन सत्पुत्रो भविष्यत्यचिरेण वै। श्रुत्वा तद्विधिमागत्य श्वशुरं प्रोक्तवानहम्॥
पत्न्या सह कृतं तेन सम्यक् श्रीरामपूजनम्। तदा रामप्रसादस्य भक्षणाद् गाधिवल्लभा॥
गर्भं दधार धर्मज्ञस्तस्याः पुत्रोऽभवत् किल। विश्वामित्र इति ख्यातो योऽभूत् क्षत्राद् द्विजर्षभः॥
भृगोः श्रुतं मया पूर्वं श्रीरामस्य सुपूजनम्। सौभाग्यसन्ततिकरं सर्वेप्सितफलप्रदम्॥
तस्मात् कुरु महाभाग महायज्ञं सुखप्रदम्। ऋचीकेरितमाकर्ण्य जगाम स्वगृहं द्विजः॥
देवि तत्राऽकरोत् पूजां नैवेद्यस्य च भक्षणात्। महारोगः क्षयं प्राप्तः पृथुकोऽतिसुखोऽभवत्॥
सत्त्वरं तत्फलं प्राप्य सदा रामार्चने रतः। एकदा पूर्णिमायां तु पृथुको रामपूजनम्॥
चकार स्वजनैः सार्धं तत्रैको धीवरोऽन्वगात्। नित्यं हिंसारतो दुष्टो बन्धुको नाम विश्रुतः॥
दृष्ट्वा रामार्चनं तत्र भुक्त्वा रामान्नमुत्तमम्। निर्धनश्चाऽतिलोभेन ययौ देशान्तरं प्रिये॥
सौराष्ट्रे स मृतो व्याघ्राद् महापापोऽघसंयुतः। यमदूताः समाजग्मुः क्रोधवन्तो भयङ्कराः॥
पाशैर्बध्वा समानेतुं तदा श्रीरामकिङ्कराः। आजग्मुस्तान् प्रपीड्योचुरयं शुद्धः सुधार्मिकः॥
दण्ड्यः कथं यमाः प्रोचुरयं हि पापविग्रहः। गोहन्ता विप्रहन्ता च चौरो हिंसारतः सदा॥

श्रीरामपार्षदा ऊचुः—रामार्चान्नं सकृच्चेन भुक्तं पापिप्रपीडकाः। स शुद्धो धर्मकामार्थी याति रामपुरं शुभम्॥
इत्युक्त्वा पुष्पके न्यस्य तं च रामान्तिकं ययुः। यमदूता यमं गत्वा वृत्तान्तं तं न्यवेदयत्॥
यमो विचिन्त्य रामस्य प्रभावं मनसा महत्। प्रणम्य राघवं दूतानुवाचेश्वरि धर्मराट्॥
सकृदेव कृतं रामकीर्तनं पूजनं सकृत्। सकृद् भुञ्जीत रामान्नं स वै त्रैलोक्यपावनः॥
सर्वैरघचयैर्युक्तः पूजनीयः सुरासुरैः। सत्तमः सर्वभूतेषु रामानुग्रहभाग्यतः॥

pdf by dindayalamani@gmail.com

रामार्चायाः प्रभावं वै सम्यग् वक्तुं न शक्यते । रामार्चा रामरूपेण सिद्धिदा सर्वदेहिनाम् ॥
रामार्चया न सिद्धयेद्यत्तन्न पश्यामि किञ्चन । दूतान् प्रबोधयित्वा स यमो रामं व्यभावयत् ॥
एवं श्रीरामपूजायाः प्रभावमतिदुर्गमम् । रामार्चां ये प्रकुर्वन्ति देवि मानवसत्तमाः ॥
ते वै रामस्वरूपाः स्युः पूज्याः सर्वैर्महर्षिभिः । अश्वमेधायुतशतं राजसूयशतायुतम् ॥
रामार्चायाः प्रसादस्य कलां नार्हन्ति षोडशीम् । रामं समर्च्य रामस्य प्रसादान्नं हनूमते ॥
यो ददाति प्रिये तस्य सर्वाभीष्टं प्रसिद्धयति । यद्यच्छीरामचन्द्राय प्रदद्यात् प्रीतिमानसः ॥
तत्सर्वं वायुपुत्राय प्रदातव्यं विशेषतः । रामसिद्धयर्थरूपोऽयं हनूमान् मारुतात्मजः ॥
तस्मात् सर्वप्रयत्नेन तोषयेद् भक्तकामदम् ॥

इति श्रीशिवसंहितायां भव्योत्तरखण्डे पृथुकबन्धुकोपाख्यानवर्णनं नाम द्वितीयोऽध्यायः ॥

अथ तृतीयोऽध्यायः

श्रीपार्वत्युवाच—केनान्येन कृतं स्वामिन् लोके रामार्चनं शुभम् । कथयस्व कृपासिन्धो महाह्लादकरं परम् ॥
श्रीशिव उवाच—पुरा देवि विशालायां कश्चिद्वैश्योऽवसत् सदा । सत्यभेति तु विख्यातो धनाढ्योऽसत्यसंयुतः ॥
देवेभ्यो ब्राह्मणेभ्यश्च प्रतिश्रुत्य न दत्तवान् । तेन पापेन भो देवि सर्वैश्वर्यमनश्नत ॥
दीनोऽतिमलिनो दुःखी बभ्राम क्षुधार्दितः । दरिद्रोऽसह्यदुःखेन मरणाय मनोदधे ॥
हिमालयं जगामाऽसौ यत्र नारायणः स्थितः । अतिदीनव्रतरतं दृष्ट्वा नारायणो हरिः ॥

pdf by dindayalamani@gmail.com

धृत्वा तु ब्राह्मणं रूपं जगाम सरभान्तिकम् । सरभं स हरिः प्राहः कस्त्वं केनातिदुःखितः ॥
श्रुत्वा तदीरितं वाक्यं प्रणम्योवाच ब्राह्मणः । अहं वैश्यो महाभाग सरभेति च विश्रुतः ॥
महासुखी धनाढ्योऽहं पूर्वावस्थासु चोद्धतः । न जाने केन पापेन सर्वं नष्टं धनं मम ॥
अतोऽहं दुःखितो दीनो व्याकुलश्च ह्युपद्रवैः । बन्धुभिः कलहो नित्यं क्षुत्क्षामोऽम्बरवर्जितः ॥
भिक्षाशी मरणप्रायः कथं जीवामि भो द्विज । तच्छ्रुत्वा ब्राह्मणो देवि दयालुर्वाक्यमब्रवीत् ॥
ब्राह्मण उवाच—कार्पण्येनातिलोभेन सत्यहीनेन सर्वथा । प्रणश्यति धनं सौख्यं दुःखं स्यान्नित्यमेव हि ॥
प्रतिज्ञाय न दत्तं ते देवाय ब्राह्मणाय च । तस्मात् तीव्रतरं दुःखं संप्राप्तं दुर्मते त्वया ॥
वैश्य उवाच—सर्वथा सत्यवाक्येन रहितोऽहं द्विजोत्तम । प्रतिज्ञाय न दत्तं हि देवाय ब्राह्मणाय च ॥
अकारणेन नष्टं मे सर्वैश्वर्यं सुहृद्गणम् । यत्नं वद महाभाग सुखी येन भवाम्यहम् ॥
ब्राह्मण उवाच—विफलप्रतिज्ञा ये वै रामभक्तेः पराङ्मुखाः । धर्माणि प्रलयं यान्ति यान्ति वंशैर्यमालयम् ॥
देवाय ब्राह्मणायैव प्रतिश्रुत्य न यच्छति । तं दृष्ट्वा पापनाशाय कुर्याच्चान्द्रायणं व्रतम् ॥
असत्यात् पातकं नास्ति न हि धर्मश्च सत्यतः । अतोऽसत्यं परित्यज्य सत्यमाश्रयते सुधीः ॥
महारोगेण ते युक्ता वंशहीना दरिद्रिणः । स विघ्नाक्रकर्माणो ये ह्यसत्यावलम्बिनः ॥
दुःखादुद्धरणं तेषां दुष्करं जन्मकोटिभिः । सत्येन मनसैवाऽपि यत् किञ्चित् कुरुते नरः ॥
सत्वरं तत्फलं प्राप्य स्वर्गिभिः सह मोदते ॥
वैश्य उवाच—भगवन् सर्वधर्मज्ञ पापे मयि कृपां कुरु । भ्रष्टप्रतिज्ञे कृपणे चातिदीने दयानिधे ॥
नश्यन्ति येन पापानि दुःखानि च ममांजसा । तद् वदस्व महाभाग दयां कृत्वा ममोपरि ॥

pdf by dindayalamani@gmail.com

ब्राह्मण उवाच—रामार्चां कुरु यत्नेन यथाशक्ति विधानतः। तत्कृते पातकं सर्वं नश्यत्येव न संशयः॥
वैश्य उवाच—विधिं वद कृपासिन्धो कथं कुर्यां तदर्चनम्। येन सर्वा ममापत्तिः सत्त्वरं नाशमाप्नुयात्॥
ब्राह्मण उवाच—विधाय मण्डपं दिव्यं कदलीस्तम्भमण्डितम्। वितानमरुणं पीतं सपताकं सतोरणम्॥
तन्मध्ये पूजयेद्रामं दिव्यैर्नानोपचारकैः। वैश्यवर्य द्विजान साधून पूजयेद्रामपूजने॥
सोऽत्र सर्वसुखं भुक्त्वा रामेण सह मोदते। रामार्चायाः प्रसादान्नं यस्तु भुञ्जीत मानवः॥
आयुरारोग्यमैश्वर्यं प्राप्नुयान्नात्र संशयः। रामार्चायाः प्रसादान्नं ये त्यजन्ति नराधमाः॥
ते यान्ति नरकं घोरं वंशहीनाः सुदुःखिताः। रामार्चायाः प्रसादान्नं न प्रयच्छति यो नरः॥
सुहृद्भ्यो बन्धुवर्गेभ्यः स दरिद्रो भवेद्ध्रुवम्। तस्माद् रामार्चनं कार्यं रामभक्तैः सुहृज्जनैः॥
युक्तः समालभेत् क्षिप्रं दुर्लभं वाञ्छितं फलम्। इह लोके सुखं भुक्त्वा परस्मिन् मोक्षमाप्नुयात्॥
श्रद्धया हि सुकर्तव्या वित्तशाठ्यं न कारयेत्। हवने चार्चने दाने यत्किञ्चिद् दीयते नरैः॥
रामार्चायां महाभाग कोटिकोटिगुणं लभेत्। इत्युक्त्वा विररामासौ ब्राह्मणो देवि धर्मवित्॥
सरभ उवाच—केनेयं भोः कृता पूर्वमपूर्वा वा द्विजोत्तम। तद् वदस्व महाभाग रामार्चायाः कथां शुभाम्॥
ब्रा० उवाच—मधुकैटभनाशाय प्रतिश्रुत्य मया कृता। ब्रह्मणाहि कृता पूर्वं सृष्ट्यादौ नारदादिभिः॥
इत्युक्ते ब्राह्मणे वैश्यो हरिं ज्ञात्वाऽतिहर्षितः। पपात दण्डवद् भूमौ पाहि मां पापिनं प्रभो॥
अतिप्रेमप्रपूर्णाङ्गं वैश्यं दृष्ट्वा ततः प्रभुः। स्वस्वरूपं समास्थाय विधिं तस्मै न्यवेदयत्॥
श्रीमहादेव उवाच—सेतिहासं विधिं श्राव्य हरिरन्तरधीयत। सरभेण कृतं देवि विधिना रामपूजनम्॥

pdf by dindayalamani@gmail.com

पूजायां राघवान्नं च वायुपुत्राय चार्पयत्। हनूमान परितुष्टः सन् सर्वैश्वर्यं प्रदत्तवान्॥
सोऽभवत् सर्वसौख्याढ्यो धनवान् पुत्रपौत्रवान्। इह लोके सुखंभुक्त्वा देहान्ते मोक्षमाप्नुयात्॥

इति श्रीशिवसंहितायां भव्योत्तरखण्डे उमामहेश्वरसंवादे सरभोपाख्यानवर्णनं नाम तृतीयोऽध्यायः।

अथ चतुर्थोऽध्यायः

श्रीपार्वत्युवाच—भगवन् कैः प्रकर्तव्या वर्णैर्यज्ञोत्तमा शुभा। रामार्चा तत्समाचक्ष्व किंवा सर्वाधिकारिणी॥
श्रीशिव उवाच—ब्राह्मणैः क्षत्रियैर्वैश्यैः कर्तव्यं राममूजनम्। सर्वाश्रमस्थैः कर्तव्यं शूद्राणां ब्राह्मणैः स्मृतम्॥
उत्तमैर्वस्तुभिर्देवि पुष्पैः पत्रैर्यवाङ्कुरैः। तिलैः पीताम्बरैर्दुग्धैः श्रीफलैश्चारुबीजकैः॥
दिव्यान्नचूर्णकैः सूक्ष्मैर्घृतैर्दिव्यैः सुवस्तुभिः। शुद्धया सितया देवि फलैर्नानाविधैः शुभैः॥
एलादिसौरभैरुग्रैः रामार्चां कारयेत सुधीः। अत्र ते कथयिष्यामि चेतिहासं पुरातनम्॥
कलिङ्गदेशे चोत्पन्नो ब्राह्मणो विमदाह्वयः। महापापरतो दुष्टो देशान्निःसारितो ययौ॥
गुर्जरे स महाधूर्तो वेश्यासक्तमनास्तदा। निर्धनो राजवाट्यां वै पुष्पचौर्यं चकार ह॥
पुष्पाण्यानीय वेश्यायै रत्यर्थं च ददाति सः। एकदा निशि पुष्पाणि चौर्येणादाय दत्तवान्॥
तस्य मार्गे च्युतं पुष्पं भूकञ्जस्य वरानने। रामार्चार्थे धर्मदत्तो वने पुष्पाय संयमौ॥
दृष्ट्वा मार्गे च्युतं पुष्पं दिव्यं नव्यं पुटे दधौ। अन्यं वन्यं समानीय रामार्चां कृतवान् द्विजः॥

pdf by dindayalamani@gmail.com

विमदश्चैकदा धृष्टो ब्राह्मणस्य गृहे शुभे। चौर्यं चकार तैर्दृष्ट्वा ताडितो मृत्युमालभत्॥
यद्वृत्तं सर्वमाख्यातं यमदूतैर्यमं प्रति। यमेनोक्तं महाकल्पमात्रं निरयभागयम्॥
पातितुं निरये श्रुत्वा ययौ दूतः प्रहर्षितः। तत्रैकं तु विमानं च पुष्पस्यासौ ददर्श ह॥
विमानस्थेन देवेन चेत्युक्तो विमदस्तदा। अत्र विश्रम्य षण्मासं पुनस्त्वं निरये व्रज॥
पुरा नीतं त्वया पुष्पं रामार्चार्थे सुसङ्गमम्। तत्प्रभावेण भो विप्र विमानमिदमागतम्॥
तच्छ्रुत्वा देववाक्यं च प्रहृष्टो विमदोऽब्रवीत्। इदं पुष्पविमानं च रामार्चार्थे ददेन्मम॥
इत्युक्ते विमदे देवि पुष्पवृद्धिरितोऽभवत्। सर्वपापक्षयाद् देवि विमदो दिव्यरूपवान्॥
ज्वलिताग्निसमाकारो जगाम हरिमन्दिरम्। विस्मरणाच्च्युतं पुष्पं रामार्चार्थे समागतम्॥
रामं जगाम विमदो योगिभिश्चातिदुर्लभम्। पुनः किं श्रद्धयाऽऽनीय रामार्चायां धनादिकम्॥
समर्पयति शुद्धात्मा स वै याति हरेः पदम्। अन्यच्छृणु महेशानि कथां कल्मषनाशिनीम्॥
एकदा ब्रह्मणा देवि कृतं रामार्चनं शुभम्। सतीनामाऽसि देवेशि यदा त्वं पूर्वजन्मनि॥
रामार्चायाः प्रसादान्नं प्रेषितं मम सन्निधौ। नारदेन समानीतं तत्सर्वं भक्षितं मया॥
तस्मिन् काले गता त्वं हि स्नानार्थं च जलाशये। स्नात्वा त्वमागता तत्र प्रसादागमनं श्रुतम्॥
मम भागं प्रसादान्नं कुत्रास्ति वृषभध्वज। प्रेमनिर्भरतो देवि नाऽऽगता हि तव स्मृतिः॥
सकलं भक्षितं भद्रे तव भागो न वर्तते। इत्युक्ते क्रोधताम्राक्षि शापो दत्तस्त्वया शिवे॥
त्वदुच्छिष्टं च येऽदन्ति ते श्वानः स्युर्न संशयः। निरये वै गमिष्यन्ति चेत्युक्त्वा विरराम ह॥

pdf by dindayalamani@gmail.com

लज्जितोऽहं तदा सम्यक् कृतवान् रामपूजनम् । रामार्चायाः प्रसादान्नं तुभ्यं सर्वेभ्य एव हि ॥
प्रदत्त्वेदं मया प्रोक्तं वाक्यं सर्वजनान् प्रति । सुहृद्भ्यो बन्धुवर्गेभ्यश्चागतेभ्यस्तथोत्सवे ॥
अदत्वा ये च भुञ्जीरन् प्रसादं तेऽधमाः स्मृता । रामप्रसाददानेन सर्वाभीष्टं प्रसिद्ध्यति ॥
अतः श्रद्धान्वितो भूत्वा कुर्याच्छ्रीराघवार्चनम् । वाचकाय प्रदातव्यं पूजोपकरणं श्रिये ॥
भोजयेत् तोषयेद् भक्त्या दिव्यैर्दिव्याम्बरादिभिः । संक्षेपेण मया देवि प्रोक्तं रामार्चनं शुभम् ॥
रामार्चनप्रभावं तु कोऽपि वक्तुं न शक्नुयात् । रामार्चनरता ये च रामनामपरायणाः ॥
धन्यास्ते मानवा येषां दर्शनात् सर्वसिद्धयः । इति ते कथिता देवि रामार्चायाः कथा शुभा ॥
सर्वाभीष्टं भवेत् तेषां शृण्वन्ति कथयन्ति ये । पापिनां भाग्यहीनानां प्रीतिश्चाऽस्मिन्न जायते ॥
कलौ पाखण्डिनः पापा भविष्यन्ति दुराशयाः । दाम्भिका दुष्टचित्ताश्च लोलुपाः कृपणाः खलाः ॥
अतः खलु भविष्यन्ति निरये दुःखभागिनः । धनपुत्रादिशोकार्ता आधिव्याधिसमाकुलाः ॥
तप्यन्ते त्रिविधैस्तापैः रामार्चनपराङ्मुखाः । येभ्यः सर्वसुखं शश्वत् प्रदातुं प्रेच्छति प्रभुः ॥
तेषां प्रीतिर्भवत्येव प्रगल्भा राघवार्चने । सद्धर्मनिरतो दान्तो रामार्चनपरायणः ॥
सर्वभूतहितः साधुः श्रीरामस्यातिवल्लभः । यद्यच्चिन्तयते कामं तत् तदाप्नोति निश्चितम् ॥
इह लोके सुखं भुक्त्वा प्राप्नुयाद् रामसन्निधिम् । रामरूपामृतानन्दसिन्धौ मग्नो भवेद् ध्रुवम् ॥

इति श्रीशिवसंहितायां भव्योत्तरखण्डे विमदोपाख्यानवर्णने रामार्चामाहात्म्यं सम्पूर्णम् ।

pdf by dindayalamani@gmail.com

अथ आरार्तिकम्

ॐ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च। त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम्॥ इदमारार्तिकं साङ्गाय सपरिवाराय भगवते श्री रामचन्द्राय नमः। ततः पुष्पाञ्जलिमादाय—ओं मालतीमल्लिकापुष्पैर्नागचम्पक-रंयुतैः। पुष्पाञ्जलिं गृहाणेदं पादाम्बुजयुगार्पितम्॥ एष पुष्पाञ्जलिः साङ्गाय सपरिवाराय भगवते श्रीरामचन्द्राय नमः। ततः प्रदक्षिणा—ओं यानि कानि च पापानि ब्रह्महत्यासमानि च। तानि तानि प्रणश्यन्ति प्रदक्षिण पदे पदे॥ इति बारचतुष्टयं प्रदक्षिणीकृत्य पूजाङ्गहवनं कुर्यात्।

अथ संक्षिप्तहवनविधिः

कुशत्रयतिलजलान्यादाय—ओं अद्य साङ्गसायुधसपरिवाराय श्रीरामचन्द्राय प्रीतये अष्टोत्तरशतं (सहस्रं वा) आज्याहुतिरहं होष्यामि। इति संकल्प्य हस्तमात्रां भूमिं कुशैः परिसमूह्य तान् कुशान् ऐशान्यां परित्यज्य गोमयेन उपलिप्य उदुपरि प्रादेशमितास्तिस्रो रेखा उल्लिख्य ताभ्यो मृदमुद्धृत्य ऐशान्यां क्षिपेत्। ततः जलेनाभ्युक्ष्य कांस्यपात्रेण अग्निमुपसमाधाय स्रुवेण आज्याहुतीर्जुहुयात्—ओं भूः स्वाहा, इदं भूः। ओं भुवः स्वाहा, इदं भुवः। ओं स्वः स्वाहा, इदं स्वः। ततः वह्नौ श्रीरामचन्द्रमावाह्य पञ्चोपचारैः सम्पूज्य 'ओं श्रीराम-चन्द्राय नमः स्वाहा' इत्यनेन (विष्णोरराटमसि' इत्यनेन वा) अष्टोत्तरशतं सहस्रं वा आज्याहुतीर्जुहुयात्। ततः पुष्पचन्दनताम्बूलादिभिः पूर्णाहुतिं दद्यादनेन—ओं मूर्द्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम्। कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः स्वाहा। ततः स्रुवेण भस्मानीय त्र्यायुषं कृत्वा नृत्य-गीतवाद्यादिभिरुत्सवं कारयन् दिवसं नीत्वा सायङ्काले पूर्वोक्तरूपेण आरार्तिकं विधाय पुष्पाञ्जलिं च दद्यात्। रात्रौ नृत्यगीतवाद्यादिभिरुत्सवं कारयेत्।

pdf by dindayalamani@gmail.com

अथ विसर्जनम्

ततः प्रभाते अरुणोदयवेलायां कृतनित्यक्रियो व्रती यथोपचारैः सर्वान् सम्पूज्य पूर्वोक्तरूपेण आरार्तिकं विधाय—ॐ देव पूजां मत्कृतां सौभाग्यशुभदां सदा। गृहीत्वा गच्छ स्वस्थानमपराधं क्षमस्व मे॥ न्यूनाधिकं च यत्किञ्चिदर्चनं च मया कृतम्। कृपां मयि विधायेत्थं क्षमस्व पुरुषोत्तम॥ रूपं देहि जयं देहि भाग्यं भगवन् देहि मे। धर्मान् देहि धनं देहि सर्वान् कामान् प्रदेहि मे॥ ॐ यान्तु देवगणाः सर्वे पूजामादाय मामकीम्। इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च॥ ॐ साङ्गसायुधसपरिवारश्रीरामचन्द्र पूजितोऽसि प्रसीद क्षमस्व स्वस्थानं गच्छ। ॐ शान्तिकलशाधिष्ठितदेवताः पूजिताः स्थ क्षमध्वं स्वस्थानं गच्छत। ततो दक्षिणा—ॐ अद्य कृतैतत् साङ्गसायुधसपरिवारश्रीरामार्चनकर्मप्रतिष्ठार्थमेतावद्द्रव्यमूल्यकहिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे। सति सम्भवे भूयसीं च कुर्यात्। तद्यथा कुशादिकमादाय—ॐ अद्य कृतैतत्साङ्गसायुधसपरिवारश्रीरामार्चनकर्मणि न्यूनाधिककर्मदोषप्रशमनार्थमेतावद्द्रव्यमूल्यकहिरण्यमग्निदैवतं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां दातुमहमुत्सृज्ये। इत्युत्सृज्य ब्राह्मणेभ्यो दद्यात्।

अथ अभिषेकः

तत्र शान्तिकलशमुत्थापयेदनेन—ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्ते महे। उपप्रयन्तु मरुतः सुदानव इन्द्रप्राशुर्भवासवाः॥ इत्युत्थाय आम्रपल्लवेन कलशजलमादाय जनानभिषिञ्चेदनेन—

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः। वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः॥ १॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते। आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा॥ २॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा॥ ३॥

pdf by dindayalamani@gmail.com

कीर्तिर्लक्ष्मीर्धृतिर्मेधा श्रद्धा पुष्टिः क्रिया मतिः । बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥ ४ ॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यस्समागताः । आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥ ५ ॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः । देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ६ ॥
ऋषयो मनवो गावो देवमातर एव च । देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ ७ ॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ ८ ॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः । एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥ ९ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ यस्य स्मृत्या च नामोक्त्या व्रतपूजाक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् । स्मरणादेव तद्विष्णोः सम्पूर्णः स्यादिति श्रुतिः ॥

प्रतिमासत्त्वे –ॐ इमां पूजां मया देव यथाशक्ति निवेदिताम् । रक्षणार्थं समादाय व्रजस्व स्थानमुत्तमम् ॥ इति पठित्वा नृत्यगीतवाद्याद्युत्सवघोषपुरस्सरं प्रतिमां नीत्वा अगाधसलिले प्रक्षिपेत् । ततो रामप्रीत्यर्थं यथाशक्ति ब्राह्मणान् भोजयित्वा स्वयमपि भुञ्जीत ।

इति श्रीशिवसंहितोक्ता श्रीरामार्चापद्धतिः समाप्ता ।

pdf by dindayalamani@gmail.com